श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये षड्विंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये षड्विंशं दशकम् ॥

## गजेन्द्रमोक्षवर्णनम्

इन्द्रद्युम्नः पाण्ड्यखण्डाधिराज -
    स्त्वद्भक्तात्मा चन्दनाद्रौ कदाचित्।
त्वत्सेवायां मग्नधीरालुलोके
    नैवागस्त्यं प्राप्तमातिथ्यकामम् ॥ **26.1** ॥

कुम्भोद्भूतिः सम्भृतक्रोधभारः
    स्तब्धात्मा त्वं हस्तिभूयं भजेति।
शप्त्वाऽथैनं प्रत्यगात् सोऽपि लेभे
    हस्तीन्द्रत्वं त्वत्स्मृतिव्यक्तिधन्यम् ॥ **26.2** ॥

दुग्धाम्भोधेर्मध्यभाजि त्रिकूटे
    क्रीडञ्छैले यूथपोऽयं वशाभिः।
सर्वान् जन्तूनत्यवर्तिष्ट शक्त्या
    त्वद्भक्तानां कुत्र नोत्कर्षलाभः ॥ **26.3** ॥

स्वेन स्थेम्ना दिव्यदेशत्वशक्त्या
    सोऽयं खेदानप्रजानन् कदाचित्।
शैलप्रान्ते घर्मतान्तः सरस्यां
    यूथैस्सार्धं त्वत्प्रणुन्नोऽभिरेमे ॥ **26.4** ॥

हूहूस्तावद् देवलस्यापि शापात्
    ग्राहीभूतस्तज्जले वर्तमानः।

जग्राहैनं हस्तिनं पाददेशे
    शान्त्यर्थं हि श्रान्तिदोऽसि स्वकानाम्॥ **26.5**॥

त्वत्सेवाया वैभवात् दुर्निरोधं
    युद्ध्यन्तं तं वत्सराणां सहस्रम्।
प्राप्ते काले त्वत्पदैकाग्र्यसिद्ध्यै
    नक्राक्रान्तं हस्तिवर्यं व्यधास्त्वम्॥ **26.6**॥

आर्तिव्यक्तप्राक्तनज्ञानभक्तिः
    शुण्डोत्क्षिप्तैः पुण्डरीकैः समर्चन्।
पूर्वाभ्यस्तं निर्विशेषात्मनिष्ठं
    स्तोत्र श्रेष्ठं सोऽन्वगादीत् परात्मन्॥ **26.7**॥

श्रुत्वा स्तोत्रं निर्गुणस्थं समस्तं
    ब्रह्मेशाद्यैर्नाहमित्यप्रयाते।
सर्वात्मा त्वं भूरिकारुण्यवेगात्
    तार्क्ष्यारूढः प्रेक्षितोऽभूः पुरस्तात्॥ **26.8**॥

हस्तीन्द्रं तं हस्तपद्मेन धृत्वा
    चक्रेण त्वं नक्रवर्यं व्यदारीः।
गन्धर्वेऽस्मिन् मुक्तशापे स हस्ती
    त्वत्सारूप्यं प्राप्य देदीप्यते स्म॥ **26.9**॥

एतद्वृत्तं त्वां च मां च प्रगे यो
    गायेत्सोऽयं भूयसे श्रेयसे स्यात्।
इत्युक्त्वैनं तेन सार्धं गतस्त्वं
    धिष्ण्यं विष्णो पाहि वातालयेश॥ **26.10**॥

॥ इति श्रीमन्नारायणीये षड्विंशं दशकं समाप्तम्॥